# 71 - एकसप्ततितम दशकम्
# केशी वधम् व्योमासुर वधम्

यत्नेषु सर्वेष्वपि नावकेशी केशी स भो जेशितु रिष्ट बन्धुः ।
त्वां सिन्धु जावाप्य इतीव मत्वा सम्प्राप्तवान् सिन्धुजवाजि रूपः॥ ॥71-1॥

गन्धर्वता मेष गतोऽपि रूक्षैर् नादैस् समुद्वेजित सर्व लोकः ।
भवत् विलोका वधि गोपवाटीं प्रमर्द्य पापः पुनराप तत् त्वाम् ॥ ॥71-2॥

ताक्ष्यार्पि ताङ्घ्रेस् तव ताक्ष्य एषः चिक्षेप वक्षो भुवि नाम पादम् ।
भृगोः पदाघात कथां निशम्य स्वेनापि शक्यं तदि तीव मोहात् ॥ ॥71-3॥

प्रवञ्चयन् नस्य खुराञ्चलं द्राक् अमुञ्च चिक्षेपिथ दूर दूरम् ।
सम्मूर्च्छितोऽपि ह्यति मूर्च्छि तेन क्रोधोष्मणा खादितु माद्रुतस् त्वाम्॥ ॥71-4॥

त्वं वाहदण्डे कृतधीश्च वाहा दण्डं न्यधास् तस्य मुखे तदानीम् ।
तद्वृद्धिरुद्ध श्वसनो गतासुः सप्ती भवन् नप्यय मैक्य मागात् ॥ ॥71-5॥

आलम्भ मात्रेण पशोस् सुराणां प्रसादके नून इवाश्वमेधे ।
कृते त्वया हर्ष वशात् सुरेन्द्राः त्वां तुष्टुवुः केशव नाम धेयम् ॥ ॥71-6॥

कंसाय ते शौरि सुतत्व मुक्त्वा तं तद् वधोत्कं प्रतिरुध्य वाचा।
प्राप्तेन केशि क्षप णावसाने श्रीनारदेन त्व मभिष्टु तोऽभूः ॥ ॥71-7॥

कदापि गोपैस् सह काननान्ते निलायन क्रीडन लोलुपं त्वाम् ।
मयात्मजः प्राप दुरन्त मायो व्योमाभिधो व्योम च रोपरोधी ॥॥71-8॥

स चोर पालायित वल्लवेषु चोरायितो गोप शिशून् पशूंश्च ।
गुहासु कृत्वा पिदधे शिलाभिः त्वया च बुद्ध्वा परिमर्दितोऽभूत्॥ ॥71-9॥

एवं विधैश् चाद्भुत केलि भेदैः आनन्द मूर्च्छा मतुलां व्रजस्य ।
पदे पदे नूत नयन् नसीमां परात्म रूपिन् पवनेश पायाः ॥ ॥71-10॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नमः॥